श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री विभीषण कृतं

# ॥ श्री आपदुद्धारण हनूमत्स्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री आपदुद्धारण हनूमत्स्तोत्रम् ॥

अस्य श्रीआपदुद्धारणहनूमत्स्तोत्र महामन्त्रस्य।
विभीषण ऋषिः। आपदुद्धारणो हनूमान् देवता।
आपदुद्धारणहनूमत्प्रसादसिद्ध्यर्थे जपे विनियोगः॥

वामे करे वैरिभीतं वहन्तं
    शैलं परे शृङ्खलहारिटङ्कम्।
दधानमच्छच्छवियज्ञसूत्रं
    भजे ज्वलत्कुण्डलमाञ्जनेयम्॥ **1** ॥

सुपीतकौपीनमुदञ्चिताङ्गुलिं
    समुज्वलन्मौञ्ज्यजिनोपवीतिनम्।
सकुण्डलं लम्बशिखासमावृतं
    तमाञ्जनेयं शरणं प्रपद्ये॥ **2** ॥

आपन्नाखिललोकार्तिहारिणे श्रीहनूमते।
अकस्मादागतोत्पातनाशनाय नमोऽस्तु ते॥ **3** ॥

सीतावियुक्तश्रीरामशोकदुःखभयापह।
तापत्रितयसंहारिन् आञ्जनेय नमोऽस्तु ते॥ **4** ॥

आधिव्याधिमहामारि ग्रहपीडापहारिणे।
प्राणापहर्त्रे दैत्यानां रामप्राणात्मने नमः॥ **5** ॥

संसारसागरावर्त कर्तव्यभ्रान्तचेतसाम्।
शरणागतमर्त्यानां शरण्याय नमोऽस्तुते॥ **6** ॥

राजद्वारि बिलद्वारि प्रवेशे भूतसङ्कुले।
गजसिंहमहाव्याघ्रचोरभीषणकानने ॥ 7 ॥

शरणाय शरण्याय वातात्मज नमोऽस्तु ते।
नमः प्लवङ्गसैन्यानां प्राणभूतात्मने नमः ॥ 8 ॥

रामेष्टं करुणापूर्णं हनूमन्तं भयापयम्।
शत्रुनाशकरं भीमं सर्वाभीष्टफलप्रदम् ॥ 9 ॥

प्रदोषे वा प्रभाते वा ये स्मरन्त्यञ्जनासुतम्।
अर्थसिद्धिं यशः कीर्तिं प्राप्नुवन्ति न संशयः ॥ 10 ॥

कारागृहे प्रयाणे च सङ्ग्रामे देशविप्लवे।
ये स्मरन्ति हनूमन्तं तेषां नास्ति विपत्तदा ॥ 11 ॥

वज्रदेहाय कालाग्निरुद्रायामिततेजसे।
ब्रह्मास्त्रस्तम्भनायास्मै नमः श्रीरुद्रमूर्तये ॥ 12 ॥

जप्त्वा स्तोत्रमिदं मन्त्रं प्रतिवारं पठेन्नरः।
राजस्थाने सभास्थाने प्राप्तवाते जपेद्ध्रुवम् ॥ 13 ॥

विभीषणकृतं स्तोत्रं यः पठेत् प्रयतो नरः।
सर्वापद्भ्यो विमुच्येत नात्र कार्या विचारणा ॥ 14 ॥

मर्कटेश महोत्साह सर्वशोकविनाशन।
शत्रून् संहर मां रक्ष श्रियं दासांश्च देहि मे ॥ 15 ॥

॥ इति श्री आपदुद्धारण हनूमत्स्तोत्रं समाप्तम् ॥